तस्याः पञ्च गुणा यथा,—
"इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता ।
संशयः प्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः ॥"
इति महाभारते मोक्षधर्म्मः ।
इष्टानिष्टविपत्तिः इष्टानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्रारूपा वृत्तिरित्यर्थः । व्यवसायः उत्साहः । समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः । संशयः कोटिद्वयस्पृक् ज्ञानम् । प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः । इति तट्टीका ॥ * ॥ तस्याः सप्त गुणा यथा—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा ।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः ॥"
इति हेमचन्द्रः ॥ * ॥
तस्या वृत्तिः पञ्चधा यथा । प्रमाणम् १ विपर्य्ययः २ विकल्पः ३ निद्रा ४ स्मृतिः ५ । इति पातञ्जलम् ॥ * ॥ बुद्धिक्षयकरा यथा,—
"शोकः क्रोधश्च लोभश्च कामो मोहः परासुता ।
ईर्ष्या मानो विचिकित्सा कृपासूया जुगुप्सता ॥
द्वादशैते बुद्धिनाशहेतवो मानसा मलाः ।"
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
अपि च ।
"बुद्धिक्षयकरा एते माषकासवमस्तिकाः ॥"
बुद्धिवृद्धिकरा यथा,—
"निम्बाटरूषवृन्ताश्च बुद्धिवृद्धिकरा मताः ॥
बुद्धिक्षयकरांस्त्यं त्यजेद्राजा च भोजने ।
भोजयेदन्वहं बुद्धिवृद्धिहेतुं नृपोत्तम ! ॥"
इति कालिकापुराणे ८६ अध्यायः ॥ * ॥
न्यायमते सा विभुगुणः पुनर्द्विविधा अनुभूतिः स्मृतिश्च । यथा,—
"विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।"
इति भाषापरिच्छेदः ॥
बुद्धिमान्, [त्] त्रि, (बुद्धिर्विद्यते यस्य । बुद्धि + मतुप् ।) बुद्धियुक्तः । ज्ञानवान् । यथा,—
"तद्भुज्यते यद्द्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम् ॥"
इति गारुडे १५५ अध्यायः ॥
बुद्धिसहायः, पुं, (बुद्धौ बुद्ध्या वा कार्य्ये इति भावः । सहायः ।) मन्त्री । इति हलायुधः ॥ मत्याः साहाय्यकर्त्ता च ॥
बुद्धीन्द्रियं, क्ली, (बुद्धेर्बुद्ध्यात्मकं वा इन्द्रियम् ।) ज्ञानेन्द्रियम् । यथा,—
"मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके ।
बुद्धीन्द्रियमिति प्राहुः शब्दकोशविचक्षणाः ॥"
इति शब्दरत्नावली ॥
(यथा मनुः । २ । ९०-९२ ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वशः ।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम् ।
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ ॥"
बुद्बुदः, पुं, वर्त्तुलाकारजलविकारः । जलविम्बुकी इति भुड्भुड़ि इति च ख्यातः । बुद्बुदोऽम्बुस्फोट इत्यन्यः । इत्यमरभरतौ ॥ अन्यच्च ।
"अभ्रच्छाया तृणादग्निर्नीचसेवा पथे जलम् ।
वेश्यारागः खले प्रीतिः षडेते बुद्बुदोपमाः ॥"
इति गारुडे १५ अध्यायः ॥
गर्भस्यावयवविशेषः । यथा,—
"पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत् ॥"
इति सुखबोधः ॥
(यदुक्तं यथा,—
"प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत् ।
जायतेबुद्बुदाकारं शोणितञ्च दशाहनि ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥)
बुध इर् ञ ङ वेदने । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् । ज्वलादिरयम् ।) इर् अबुधत् अबोधीत् । ज बोधः बुधः । ञ बोधति बोधते । इति दुर्गादासः ॥
बुध, औ विज्ञापने । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-अनिट् ।) औ बोद्धा । बोधति गुरुः । इति दुर्गादासः ॥
बुध, य ङ औ वेदने । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ बुध्यते शास्त्रं सुधीः । औ बोद्धा । इति दुर्गादासः ॥ (जागरार्थे अकर्म्मकोऽपि । यथा, रघौ ।१०।६।
"ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः ॥"
"आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां जहौ इत्यर्थः ।" इति तट्टीका ॥)
बुधः, पुं, (बुध्यते यः । "बुध् + इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) पण्डितः । तत्पर्य्यायः । विद्वान् २ विपश्चित् ३ दोषज्ञः ४ सन् ५ सुधीः ६ कोविदः ७ धीरः ८ मनीषी ९ ज्ञः १० प्राज्ञः ११ संख्यावान् १२ पण्डितः १३ कविः १४ धीमान् १५ सूरिः १६ कृती १७ कृष्टिः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२ । इत्यमरः । २ । ७ । ५ ॥ विदग्धः २३ दूरदृक् २४ सूरी २५ वेदी २६ वृद्धः २७ बुद्धः २८ विधानगः २९ प्रज्ञिलः ३० । इति शब्दरत्नावली ॥ व्यक्तः ३१ प्राप्तरूपः ३२ सुरूपः ३३ अभिरूपः ३४ बुधानः ३५ कवितावेदी ३६ वप्ता ३७ विदितः ३८ कविः ३९ । इति जटाधरः ॥ (यथा, नवरत्ने । १ ।
"अद्युग्मं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्य्याद्वशम् ॥")
नवग्रहान्तर्गतचतुर्थग्रहः । स च बृहस्पतिभार्य्यातारागर्भे चन्द्राज्जातः । तत्पर्य्यायः । रौहिणेयः २ सौम्यः ३ । इत्यमरः । १ । ३ । २६ । हेमा ४ वित् ५ ज्ञः ६ बोधनः ७ इन्दुपुत्रः ८ , इति ज्योतिस्तत्त्वम् ॥ * ॥ तस्य जन्मादिवृत्तान्तं यथा । "मदावलेपाच्च सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार । बहुशस्तु बृहस्पतिचोदितेन भगवता ब्रह्मणा चोद्यमानः सकलैश्च देवर्षिभिर्याच्यमानोऽपि न मुमोच । तस्य बृहस्पतिद्वेषादुशना पार्ष्णिग्राहोऽभूत् । अङ्गिरसश्च सकाशादुपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत् । यतश्चोशना ततो हि जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यमञ्चक्रुः । बृहस्पतेरपि सकलदेवसैन्यसहायः शक्रोऽभवत् । एवं तयोरतीवोग्रः संग्रामस्तारानिमित्तस्तारकामयनामाभवत् । ततश्च समस्तशस्त्राण्यसुरेषु रुद्रपुरोगमा देवाः देवेषु चाशेषदानवा मुमुचुः । एवञ्च देवासुराहवक्षोभक्षुब्धहृदयमशेषमेव जगद् ब्रह्माणं शरणं जगाम । ततश्च भगवानप्युशनसं शङ्करमसुरान् देवांश्च निवार्य्य बृहस्पतये तारामदात् । ताञ्चान्तःप्रसवामवलोक्य बृहस्पतिराह । नैष मम क्षेत्रे भवत्यान्यसुतो धार्य्यस्त उत्सृजैनं अलमलमतिधार्ष्ट्येनेति । सा च तेनैवमुक्ता पतिव्रता भर्तृवचनात्तमिषीकास्तम्बे गर्भमुत्ससर्ज । स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप । बृहस्पतिमिन्दुञ्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः । सत्यं कथयास्माकमतिसुभगे ! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच । बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे ततः स कुमारस्तां शप्तुमुद्यतः प्राह च । दुष्टाम्ब ! कस्मान्मम तातं नाख्यासि । अद्यैव ते व्यलीकलज्जावत्यास्तथा शास्तिमयमहं करोमि । यथा नैवमन्याप्यतिमन्थरवचना भविष्यतीति । अथ भगवान् पितामहस्तं कुमारं सन्निवार्य्य स्वयमपृच्छत्ताराम् । कथय वत्से ! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्येवमुक्ता लज्जाजड़माह सोमस्येति । ततः स्फुरदुच्छूसिताऽमलकपोलकान्तिर्भगवानुडुपतिरालिङ्ग्य कुमारं साधु साधु वत्स ! प्राज्ञोऽसीति बुध इति नाम चक्रे । इति विष्णुपुराणे ४ अंशे ६ अध्यायः ॥ मत्स्यपुराणे चतुर्विंशाध्याये विशेषश्चायम् ।
सूत उवाच ।
"ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः ।
दिव्यपीताम्बरधरः पीताभरणभूषितः ॥
सर्व्वास्त्रशास्त्रविद्विद्वान् हस्तिशास्त्रप्रवर्त्तकः ।
राज्ञः सोमस्य पुत्त्रत्वाद्राजपुत्त्रो बुधः स्मृतः ॥
जातमात्रः स तेजांसि सर्व्वाण्येवाधिपद्बली ।
ब्रह्माद्यास्तत्र ते जग्मुर्देवा देवर्षिभिः सह ॥
बृहस्पतिगृहे सर्व्वं जातकर्म्मोत्सवं तदा ।
पप्रच्छुश्च सुरास्तारां केन जातः कुमारकः ॥
ततः सा लज्जिता तेषां न किञ्चिदवदत्तदा ।
पुनः पुनस्तदा पृष्टा लज्जयन्ती वराङ्गना ॥
सोमस्येति चिरादाह ततोऽगृह्णाद्विधुः सुतम् ।